CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥श्रीगणेशायनमः॥रथसप्तमीपूजाविधेयंते॥ॐआकृष्णेत्यादिःममइहजन्मनिजन्मांतरेचभर्तासहअखंडसौभाग्यप्राप्त्यर्थंपुत्रपौत्राभिवृध्यर्थंरथसप्तमीविहितसविताश्रीसूर्यनारायणप्रीत्यर्थंपुराणोक्तमंत्रेणषोडशोपचारैःप्रतिवार्षिकीपूजनमहंकरिष्ये॥तथाचआसनादिकलशाराधनंचकरिष्ये॥ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसंनिविष्टः॥केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः॥सूर्यायसोमायसहपरिवारायनमः॥आवाहयामि॥तेजोराशिश्चियायुक्तंतप्तकांचनसन्निभं॥किरीटिनंपद्मनेत्रंपद्मरागविभूषितं॥आवाहनं॥पद्मासनःपद्मकरःपद्मकर्भसमद्युतिः॥सप्ताश्वरथसंयुक्तोद्विभुजस्यात्सदारविः॥श्रीसूर्यायनमः॥आसनं॥कालात्मासर्वभूतात्मावेदात्माविश्वतोमुखः॥जन्ममृत्युजराव्याधिसंसारभयनाशनः॥पाद्यं॥दत्तमर्घ्यंमयाभानोत्वंगृहाणनमोस्तुते॥हिमघ्नायतमोघ्नायरोगघ्नायन

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ओं नमः॥अर्घ्यं॥यस्योदयेनेहजगत्प्रवृध्यतेप्रवर्तनेचाखिलकर्मसिद्धये॥ब्रह्मेंद्र
नारायणरुद्रवंदितःसतःसहायंकुरुतांजगत्त्रयेविः॥आचमनीयं॥नमोस्तुसूर्यायं
सहस्रभानवेसहस्रशाखान्वितसंभवात्मने॥सहस्रयोगोद्भवभावभाविनेस
हस्रसंख्यायुगधारिणेनमः॥अथपंचामृतमिंनमिंनमंत्र॥क्षीरोदतनयाननं
क्षीरोदतनयप्रिया॥क्षीरोदगंधसंयुक्तापयस्नानायगृह्यतां॥पयं॥जगदेतन्न
थासित्वंतथाभिजगतांहितं॥दधिवामनरूपेणदधिस्नानायगृह्यतां॥दधि॥घृ ना
तकुंभसमायुक्तंघृतयोनिघृतप्रिया॥घृतंमुकुघृतदानाघृतस्नानायगृह्य
तां॥घृतं॥मधुरूपेवसंतस्त्वंत्वमेवजगतांमधु॥मधुसूदनसंप्रीत्यामधुस्ना
नायगृह्यतां॥मधु॥जगदेतन्नथासित्वंशर्करागुडसंयुता॥अनंतशर्कराप्री
त्यास्नानार्थंप्रतिगृह्यतां॥इतिपंचामृतस्नानं॥नमोनमःपापविनाशनायवि
श्वात्मनेसप्ततुरंगमाय॥सामर्ग्यजूंषिचविधेविधानाभवाब्धिपोतायनमो ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नमस्ते॥उदये ब्रह्मरूपस्त्वंमध्ह्नेतुमहेश्वरः॥अस्तमानेस्वयंविष्णुस्त्रयीमूर्तिर्दि
वाकरः॥इत्थंमध्येपुरुषंपुराणंनारायणंशाश्वतमादिदेवं॥संचिंत्यसूर्यंचविरा
जमानंमृत्युंसयोगीजितवांस्तथैव॥हीनविभक्तिवर्णैश्चमात्राक्षरैस्तथा॥तत्स
र्वंक्षम्यतांदेवप्रसादंकुरुकिंकरे॥नमःसूर्यायशांतायसगुणायादिहेतवे॥निवे
दयामिचात्मानंत्वंगतिःपरमेश्वर॥शुद्धोदकस्नानं॥स्वानंदबोधसंतुष्टःकरुणा
दिगुणान्वितः॥परिपूर्णःस्वयंवेद्यःपरमानंदसंस्थितः॥वस्त्रं॥नास्त्यस्तित्यसमोदे
वोनास्त्यादित्यसमागतिः॥प्रत्यक्षोभगवान्विष्णुर्येनविश्वंप्रतिष्ठितं॥यज्ञोपवीतं॥
अजायत्रोकत्रयपावनायभूतात्मनेगोपतयेवृषाय॥सूर्यायसर्वंप्रत्ययांतकाय
नमोमहाकारुणिकोनमाय॥चंदनं॥नमोनमःसहस्रांशोआदित्यायनमोनमः॥
नमःपद्मप्रबोधायनमस्तेहृदयात्मने॥अक्षतां॥हरिद्रेरंचितेदेविहरिद्रेनार्चितः
सदा॥हरिद्रासर्वपापघ्नीमतःशांतिंप्रयच्छमे॥हरिद्रा॥कुंकुमंकामिकंदिव्यंकामना

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कामसंभवौ॥ कुंकुमेनार्चिता देवमतः शांतिं प्रयच्छमे॥ कुंकुमं॥ नाना परिमलद्र
व्यं समर्पयामि॥ नमो विश्वप्रबोधायनमो भ्राजिष्णु विष्णवे॥ ज्योतिषे चनमस्तु
भ्यं ज्ञानार्कायनमोनमः॥ पुष्पं॥ करवीरैरिति॥ अथांगपूजा॥ आदित्यायनमः॥ प
दौ पूजयामि॥ सवित्रे॰ जंघां॰ सूर्याय॰ जानुनी॰ रवयाय॰ ऊरुं॰ पूष्णे॰ कटिं॰ गभस्त
ये॰ नाभिं॰ मार्तंडाय॰ वक्षस्थलं॰ जगत्चक्षुषे॰ शिरं॰ अथनामावलिरुच्यते॥
सूर्याय॰ अर्यम्णे॰ भगाय॰ त्वष्ट्रे॰ पूष्णे॰ अर्कायं॰ सवित्रे॰ रवये॰ गभस्तिपतये॰ अजाय॰का
लाय॰ मृत्यवे॰ धात्रे॰ प्रभाकराय॰ पृथ्वीव्यापिने॰ वायवे॰ सोमाय॰ बृहस्पतये॰ शुक्रा
य॰ बुधाय॰ अंगारकाय॰ इंद्राय॰ विवस्वते॰ दीप्तांशवे॰ शुचये॰ शौरयाय॰ शनैश्चराय॰
ब्रह्मणे॰ विष्णवे॰ रुद्राय॰ स्कंदाय॰ वैश्रवणाय॰ यमाय॰ वैद्युताय॰ अग्नये॰ धनाय॰ तेज
सांपतये॰ धर्मध्वजाय॰ वेदकर्त्रे॰ वेदांगाय॰ वेदवाहनाय॰ कृताय॰ त्रेतादापराय॰ क
लये॰ सर्वमलाश्रयाय॰ कलाकाष्ठामुहूर्ताय॰ क्षपाय॰ क्षणाय॰ संवत्सरकराय॰ अश्वत्था

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

य॰कालचक्राय॰विभावसवे॰पुरुषाय॰शाश्वताय॰योगिने॰व्यक्ताव्यक्ताय॰सनातनाय॰कालाध्यक्षाय॰प्रजाध्यक्षाय॰विश्वकर्मणे॰तमोनुदाय॰वरुणाय॰सागराय॰अंशवे॰जीमूताय॰जीवनाय॰भूताश्रयाय॰भूतपतये॰सर्वलोकनमस्कृताय॰स्रष्टे॰संवर्तकाय॰वह्नये॰सर्वस्यादये॰कपिलाय॰भवाय॰कामदाय॰सर्वतोमुखाय॰जयाय॰विशालाय॰वरदाय॰सर्वधातुनिषेविताय॰मुकुटिने॰भूतादये॰शीघ्रकामाय॰कामधारिणाय॰धन्वंतरये॰धूमकेतवे॰आदिदेवाय॰अदितिसुताय॰द्वादशात्मने॰अरविंदाक्षाय॰पित्रे॰मात्रे॰पितामहाय॰स्वर्गद्वाराय॰प्रजाद्वाराय॰मोक्षद्वाराय॰त्रिविष्टपाय॰देहकर्त्रे॰प्रशांतात्मने॰विश्वात्मने॰विश्वतोमुखाय॰चराचरात्मने॰सूक्ष्माय॰मैत्रेयाय॰करुणान्विताय॰इतिअष्टोत्तरशतनामंसमाप्तं॥आदित्यमंत्रयुक्तस्यआदित्यभुवनेश्वरं॥आदित्यान्नापरंदैवमादित्यपरमेश्वरा॥धूपं॥विवस्वतेज्ञानभूतांतरात्मनेजगत्यदीपायजगद्विनेषणे॥स्वयंभु

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

७ विहितमपि हितंवासर्वमेतत्क्षमस्वजयजयकरुणाब्धेश्रीदिवाकरप्रभो॥७

वेदाग्निसहस्रचक्षुषेस्करोत्तमायामिततेजसेनमः॥दीपं॥आदित्यःसविताविष्णुःखगः
पूषागभस्तिमान्॥सुवर्णस्फटिकोभानुःस्फुरितोविश्वतापनः॥नैवेद्यं॥आचमनीयं॥
करोद्वर्तनं॥पूगीफलंमहद्दिव्यंनागवल्लीदलान्वितं॥कर्पूरैलासमायुक्तंताम्बूलंप्रति
गृह्यतां॥तांबूलं॥इदंफलमितिफलं॥हिरण्यगर्भेतिदक्षिणां॥नीराजनदीपं॥काय
जंकर्मजंवापिमदजंदर्पणंतथा॥संपूज्ययत्कृतंपापंदहत्वंभुनसंशयः॥प्रदक्षि
णां॥नमःसवित्रेपुष्पांजलिं॥करचरणकृतंवाकायजंकर्मजंवा॥श्रवणनयनजंवामा न
नसंवापराधैं॥इतिनमस्कारः॥श्रियंप्राप्नोतिविपुलांजन्ममाप्नोत्यनागमं॥एवमा
राधितःसूर्यःसर्वान्कामान्विधास्यति॥इतिप्रार्थना॥द्वादशार्घ्यानिदत्वा॥मित्रा॰र्घ
येसूर्यायभानवेखगायपूष्णेहिरण्यगर्भायमरीचयेनआदित्यासवित्रेअर्कायभा
स्करायइतिरथसप्तमीपूजासमाप्तं॥व्यतीपातनमस्तेस्तुसोमसूर्यसुतप्रभो॥य
द्यदानादिकंकिंचिन्नदक्षंमिहोस्तुते॥गुडोमाचमिदंस्वस्त्येहमविघ्नकरान्वितं॥नद्य ३

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नंमेरुणातुल्यंनन्नोयंसागरोपमा॥देवस्यत्वा०॥ ७ ॥इत्युपनामकुंदेविनायकभट
इदंपुस्तकं॥ ७ ॥संवत्१८४३शाके१७०८माघशुद्धे५बुद्ध॥ ७ ॥ ॥
रथसप्तमीउदयव्यापिनीग्राह्या॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi